# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - अक्टूबर - 2019

| | | |
|---|---|---|
| **कक्षा-आचार्य(SEM-१)(New&Old)** | **प्रश्नपत्रम् – 4** | गुणाः –70 |
| विषयः – रामानुजवेदान्तः | **कोड –C.C.4.1.3** | समयः- 8 तः 11 |
| दिनाङ्कः –12/10/2019 | सन्दर्भग्रन्थः – छान्दोग्योपनिषद् | |

**प्रथमान्वितिः (Unit 1)** गुणाः

**प्रश्न १ अधस्तनमंत्रयोरेकस्य मंत्रस्य व्याख्यानं यथाग्रन्थं विधेयम्।** ५

१ वागेवर्क प्राणः सामोमित्येतत् अक्षरमुद्गीथः।
तद्वा एतन्मिथुनं यद्वाक्च प्राणश्च ऋक् च साम च॥

२ ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे ।
तं हासुरा पाप्पना विविधुः।
तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विध्दः ॥

**प्रश्न २ कस्यचिदेकस्य खण्डस्य सारांशं यथाग्रन्थं प्रतिपादयत।** १०

१ तृतीयः खण्डः प्रथमपाठकस्य।

२ प्रथमपाठकस्य पञ्चमः खण्डः।

**द्वितीयान्वितिः (Unit 2)**

**प्रश्न ३ अधस्तनमंत्रयोरेकस्य मंत्रस्य व्याख्यानं यथाग्रन्थं विधेयम्।** ५

१ अथ य एषोऽन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्सोम तदुक्थं तद्यनुस्तद् ब्रह्म।
तस्यैतस्य तदेव रूपं यदमुष्य रूपं यावमुष्यगेष्णौ तौ गेष्णौ यन्नाम तन्नाम॥

२ सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्ति।
आकाशो ह्येवैभ्यो ज्यायान्। आकाशः परायणम्॥

**प्रश्न ४ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ सप्तमखण्डस्य सारांशं यथाग्रन्थं विवेचयत।

२ शिलकदाल्भ्यजैवलिसंवादं यथाग्रन्थं निरूपयत।

## तृतीयान्वितिः (Unit 3)

**प्रश्न ५ अधस्तनमंत्रयोरेकस्य मंत्रस्य व्याख्यानं यथाग्रन्थं विधेयम्।** ५

१ सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते
सैषा देवता प्रस्तावमन्वायत्ता।
तां चेदविद्वान् प्रास्तोष्यो मूर्धा ते व्यपतिष्यत् तथोक्तस्य मयेति॥

२ ॐ समस्तस्य खलु साम्न उपासनं साधु।
यत् खलु साधु तत्सामेत्याचक्षते यदसाधुतदसामेति॥

**प्रश्न ६ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ अथातः शौव उद्गीथ इति सविशदं प्रस्तूयताम्।

२ पञ्चविधे साम्नि वृष्टिदृष्टिः कर्तव्या इति यथाग्रन्थं विशदयत।

## चतुर्थान्वितिः (Unit 4)

**प्रश्न ७ अधस्तनमंत्रयोरेकस्य मंत्रस्य व्याख्यानं यथाग्रन्थं विधेयम्।** ५

१ ऋतुषु पञ्चविधं सामोपासीत वसन्तो हिंकारो ग्रीष्मः प्रस्तावो वर्षा
उद्गीथः शरत्प्रतिहारो हेमन्तो निधनम्॥

२ मनो हिंकारो वाक्प्रस्तावः चक्षुरुद्गीथः श्रोत्रं प्रतिहारः प्राणो निधनम्।
एतद् गायत्रं प्राणेषु प्रोतम्।

**प्रश्न ८ कस्यचिदेकस्य उत्तरं लेख्यम्।** १०

१ द्वितीयपाठकस्य नवमखण्डस्य सारांशं लिखत।

२ ओंकारेण ब्रह्मोपासनविधिः यथाग्रन्थं प्रतिपाद्यताम्।

**प्रश्न ९ दशप्रश्नानामतिलघूत्तराणि लिखत।** १०

१ छान्दोग्योपनिषदः प्रथमं मन्त्रं लिखत।

२ ‘वागेर्वक्’ इत्यस्य पदच्छेदं कुरुत।

३ प्रजापतिसुताः कतिविधाः?के च ते?

४ ‘आरवणम्’ इत्यस्य कोऽर्थः?

५ कः प्राणः?

६ योगिभिः चक्षुषि को दृश्यते?

७ प्रवाहणः कस्य सुतः आसीत्?

८ प्रथमपाठकस्य सप्तमे खण्डे कति मंत्राः सन्ति?

९ उद्गीथे के त्रयाः कुशलाः बभूवुः?

१० आकाशशब्दाभिधेयः कः?

११ उषस्तेः पितुर्नामधेयं किम् आसीत्?

१२ मटची शब्दस्य कोऽर्थः?

१३ साम्नः पञ्चविधा अवयवाः के सन्ति?

१४ द्वितीयपाठकस्य कति खण्डास्सन्ति?

१५ द्वितीयपाठकस्य चतुर्विंशे खण्डे कति मन्त्राः सन्ति?